वर्षम् - ०१ अङ्कः - ०१ शोधज्योतिः
जनवरी-दिसम्बर, २०१९ ISSN-2350-0700

# न्यायकौस्तुभे सङ्गतिनिरूपणम्

**मेडूरि. सूर्यनारायणः***

## दर्शनस्य प्राधान्यम्

जगत्यस्मिन् संसरत्सु जीवेषु, मानवस्यैव अत्युन्नतस्थानमानादिकं वरीवर्ति इति सर्वसम्मतम्। एतादृशस्य औन्नत्यकारणं बुद्धिरेव। **"भूतानां प्राणिनः श्रेष्ठाः, प्राणिनां बुद्धिजीविनः, बुद्धिमत्सु नराः श्रेष्ठाः...."** इति मनोर्वाणी[१] जगत्यस्मिन् बुद्धिमताम् अद्भुतं स्थानं सम्यक् ज्ञापयति। भगवतः अद्भुतसृष्टौ बुद्धेः विकास एव जगतोऽस्य अभिवृद्धेः गणनायां मानदण्डः। एवं बुद्धेरेव अतिगरीयस्साधनमिति सिद्धे, सैव दर्शनानामुद्भवे कारणम्। वस्तुतः **"दर्शन"**शब्दस्य व्युत्पत्तिः **वात्स्यायनभाष्ये** एवं प्रतिपादितास्ति। **"दर्शयतीति दर्शनम्"**। किं दर्शयति? **" तत्त्वं"** दर्शयतीत्यर्थः।

**"तत्त्वं नाम सतश्च सद्भावः। असतश्च असद्भावः"**[२] इत्युच्यते। एतेन दर्शनानि सर्वाण्यपि तत्त्वज्ञानप्रतिपादकानि, बुद्धिक्षेत्रान्तर्भूतानि इत्युक्तं भवति। तत्त्वानि च बुद्धिगोचराणि भवन्ति।

## न्यायशास्त्रस्य महत्त्वम्

**"नीयते अयनम् येनाऽसौ इति न्यायः।", "प्रमाणैरर्थपरीक्षणं न्यायः"** इत्येवं रीत्या न्यायशास्त्रस्य बह्व्यो व्युत्पत्तयः ग्रन्थेषु प्रतिपादिताः। न्यायदर्शनस्य प्रणेता गौतमः। युक्तिप्रधानतया, प्रमाणैः सह अर्थपरीक्षणं कृत्वा निश्चयतया सिद्धान्तव्यवस्थापनादिकं कर्तुं अतीव उपयुज्यते न्यायशास्त्रम्। न्यायदर्शनद्वारेणैव सामाजिकः धर्माधर्महेयाहेयविवेचनज्ञानं तत्त्वज्ञानञ्च प्राप्य मोक्षकामुकः भवितुं प्रभवति। न्यायवैशेषिकदर्शनयोः न्यायशास्त्रस्य प्रमाणप्रधानत्वात् तस्य प्रमाणशास्त्रम् इति नाम। वैशेषिकशास्त्रन्तु पदार्थप्रधानम्। अत एवोक्तं - **"काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकम्"** इति विद्वतल्लजैः। पदार्थस्वरूपनिरूपकत्वेन यथा वैशेषिकस्य तथा प्रमाणतत्त्वनिरूपकत्वेन न्यायस्यापि

---

* गवेषकः, न्यायविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः

[१] मनुस्मृतिः।

[२] न्यायभाष्यम्।

तावदेव प्राधान्यमितरोपकारकत्वञ्च जागर्तीति वस्तुतत्त्वदर्शिनां निर्मत्सरा दृष्टिः। प्रमाणविचारेण साकं लक्षणपरिष्करणबहुलमवच्छेदकावच्छिन्नादिनव्यपारिभाषिकशैलीवैचित्र्यप्रचुरस्य ग्रन्थजातं नव्यन्यायमिति च सार्वजनीनो व्यवहारः।

नव्यन्यायस्य मूलं स्त्रोतः गङ्गेशोपाध्यायकृतचिन्तामणिग्रन्थ एवेति विदुषां निर्णयः। अयं किल महानुभावः, मिथिलाभिजनः, प्रमाणविचारस्य असाधारणप्राधान्यं दत्त्वा, प्रमाणविचारप्रक्रियायाः मार्गदर्शकः समभवत्। गङ्गेशोपाध्यायस्य मार्गदर्शने एव बहवः न्यायशास्त्रग्रन्थकाराः सञ्चरन्ति। गङ्गेशोपाध्यायविरचिततत्त्वचिन्तामणिग्रन्थस्य व्याख्यानोपव्याख्यानपरम्परैव नव्यन्यायत्वेन परिगण्यते। गङ्गेशोपाध्यायविरचितत्त्वचिन्तामणिग्रन्थादारभ्य प्रादुर्भूताः व्याख्योपव्याख्यात्मकाः सर्वेऽपि ग्रन्थाः नव्यन्याये प्रकाशन्ते।

नव्यन्यायमूलभूतेन, चतुर्दशशताब्दवासिना, महामहोपाध्यायेन, श्रीमता गङ्गेशोपाध्यायेन सङ्ग्रथितः **"तत्त्वचिन्तामणिग्रन्थः"** चिन्तामणिरिव सकलार्थसन्धायक इति विदितमेव सर्वेषां विद्वतल्लजानाम्। तत्त्वचिन्तामणिव्याख्यातृषु प्रसिद्धः "रघुनाथशिरोमणिः" तदीयव्याख्यानस्य नाम **"मणिदीधितिः"।** दीधितेश्च बहव्यः व्याख्योपव्याख्याः समुपलभ्यन्ते। दीधितिव्याख्यासु अन्यतमा भवानन्दस्य "भवानन्दीयव्याख्या" विराजते। तस्याश्च भवानन्द्याः "भवानन्दीयप्रकाशः" इति व्याख्यां कृतवान् **महादेवपुणतामकरः। न्यायकौस्तुभग्रन्थकारः महादेवः -** गङ्गेशस्य दार्शनिकतां परिशील्य तस्य लक्षणपरिष्करणप्रक्रियाम् अनुसृतवान् **"महादेवपुणतामकरः"।** महादेवोऽयं पुणतामकरवंशीयः महराष्ट्रदेशीयः सप्तदशशतके प्रादुर्भूतः। अयं महादेवः मुकुन्दभट्टस्य सुतः। श्रीकण्ठदीक्षितस्य शिष्यः, काश्यां न्यवसत्। एतस्य ग्रन्थकारस्य चरित्रम् इदानीं महाराष्ट्रदेशेऽपि मृग्यमेव।

एषः महादेवः, **"तत्त्वचिन्तामणिदीधितिभवानन्दीयव्याख्यायाः "प्रकाश"** नामक विस्तरव्याख्यां लिखित्वा, तत्रापि प्रकाशव्याख्यायाः काठिन्यं ज्ञात्वा, बालानाम् अवगमनाय, तस्यैव व्याख्यानस्य **"सर्वोपकारिणी"** नामकं संग्रहव्याख्यानञ्च प्राणैषीत्। तत्त्वचिन्तामणिग्रन्थस्य व्याख्यानोपव्याख्यानपरम्परायाम् अन्यतमा भवति **"सर्वोपकारिणी"।**

एवमेव **"न्यायकौस्तुभ" नामक प्रकरणग्रन्थः,** लौगाक्षिभास्करस्य "पदार्थप्रकाश"-नामकग्रन्थस्य व्याख्यानम्, "ईश्वरवादः", "सादृश्यवादः" "अनुमितिपरामर्शयोः कार्यकारणवादः" इत्येवं प्रकरणान्यपि अलिखत् स एव महाभागः।

## सङ्गतेः वैशिष्ट्यम्

**"सङ्गतित्वं नाम अनन्तराभिधानप्रयोजकजिज्ञासाजनकस्मरणप्रयोजकनिरूप्यनिष्ठसम्बन्धत्वम्।"** इति प्रतिपादितमेव। सङ्गतेः ज्ञानं विना ग्रन्थस्थ विषयाणां पठनाय अध्येतृणां आसत्तिः न भवति।

तादृशाभिरुचिं जनयति सङ्गतिः। “एकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकमिति” न्यायेन अपरसम्बन्धिव्याप्तिविषयकं स्मरणम्, तदनु प्रामाण्यनिरूपणानन्तरं व्याप्तिनिरूपणं भूयादिति जिज्ञासा, तदनु (अनन्तराभिधानम्) व्याप्तिनिरूपणमिति क्रमः अध्येतृणाम् अवगमनाय बोधनीयो भवति।

## न्यायकौस्तुभे सङ्गतेः नूतनत्वम्

प्रायशः सङ्गतिनिरूपणं न्यायशास्त्रग्रन्थेषु प्रदर्शितमेव। किन्तु महादेवः न्यायकौस्तुभे, अनुमानखण्डे सङ्गतिनिरूपणं विभिन्नतया प्रतिपादितवान्। सम्बन्धविशेषस्यैव सङ्गतिपदार्थतया विशेष्य च “एकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकमिति” रीत्या स्मृतिद्वारा अनन्तराभिधानप्रयोजकतारूपत्वेन तादृशानन्तराभिधानप्रयोजकसम्बन्धित्वरूपतादृशप्रयोजकताविशेषसम्बन्धेन अनन्तराभिधानविशिष्टसंबन्धत्वस्यैव वा सङ्गतिलक्षणलक्ष्यतावच्छेदकत्वेन प्रत्यक्षनिष्टानुमानकार्यत्वस्य तदनाक्रान्ततया अनुमाननिष्ठकार्यत्वस्यैव तदाक्रान्ततया तस्य सङ्गतिलक्षणाक्रान्ततया सङ्गतित्वोपपत्तेः इति नूतनपद्धतिं अनुसरोति महादेवः।

एवमेव यत्र कार्यनिरूपणानन्तरं कारणनिरूपणं, तत्र कारणत्वस्यापि सङ्गतिलक्षणाक्रान्ततया सङ्गतित्वोपपत्तेः। एवमेव यत्र कारणनिरूपणानन्तरं कार्यनिरूपणं, तत्र कारणत्वस्यापि सङ्गतिलक्षणाक्रान्तत्वं सूपपादम् इति कथयति महादेवः। **“न्यायकौस्तुभ”**ग्रन्थे **१.पूर्वाभिहितनिरूपितानन्तराभिधेयनिष्ठा २. अनन्तराभिधेयनिरूपितपूर्वाभिहितनिष्ठा** इत्युक्त्वा सङ्गतेः द्वैविध्यं प्रतिपादयति महादेवः।

सङ्गतिनिरूपणावसरे अस्मिन् ग्रन्थे नूतनविषयाः प्रतिपादिताः। अस्मिन् ग्रन्थे एककार्यत्वसङ्गतिः प्रदर्शिता। एकस्यैव कार्यस्य कारणद्वयम् अङ्गीक्रियते चेत् तस्यैव एककार्यत्वसङ्गतिरिति व्यवहारः। तत्र द्वैविध्यम् एवं प्रदर्शयति महादेवपुणतामकरः। **१. अनुमाननिष्ठप्रत्यक्षकार्यत्वमाद्या, २. प्रत्यक्षनिष्ठमनुमानकारणत्वञ्च द्वितीया।** परस्परसङ्गतेरेव औचित्यावर्जितत्वेन सम्प्रदायसिद्धत्वात् द्वयोरप्यनन्तराभिधानप्रयोजकसम्बन्धत्वरूपसङ्गतिपदप्रवृत्तिनिमित्ताक्रान्तत्वेन अथवा एकशेषस्य इति निरूपयति।

यत्र च आधारादिनिरूपणानन्तरं प्रसङ्गादिसङ्गत्या आधेयादिनिरूपणम् भवति। तत्रापि आधाराधेयत्वादेः आधारादिनिरूपितसङ्गतित्ववदाधारादावप्याधारत्वादेः आधेयतादिनिरूपतसङ्गतित्वसम्भवेन सर्वत्रैव सङ्गतेः परस्परनिरूपितत्वमव्याहृतम्। **एवञ्चानन्तराभिधानव्याप्यत्वमाद्यसङ्गतेः लक्षणम्। पूर्वाभिधानव्याप्यत्वञ्च द्वितीयसङ्गतेः लक्षणम्**

इति लक्षणद्वयं नूतनतया ग्रन्थेऽस्मिन् आविष्कृतम्। न केवलं सङ्गतिविषये, अपि च बहुषु स्थलेषु, लक्षणनिरूपणप्रक्रियासु स्वकीयविलक्षणकथनशैलीं प्रदर्शितवान् महादेवपुणतामकरः। न्यायदर्शनग्रन्थकारेषु एकं विशिष्टस्थानं प्राप्तवान् महादेवः इति वक्तुं नास्ति संशयः।

## उपयुक्तग्रन्थसूची


1. Manusmriti Commentary by Ullukabhatta, Chapter 1, 96th sloka, Published by Nirnaya sagara press, Pune in 1925.
2. Nyaya Bhashya Written by Vatsayana, Edited by Dwarkadas Shastri, Published by Bauddha Bharati, Varanasi in 1998.